अथ सदृयुक्तिमाह ।
'यत् परिध्यर्द्धविष्कम्भं वृत्तं कृत्वा किलांशुकम् ।
तेनार्द्धं छाद्यते गोलः किञ्चिदस्यच शिष्यते ॥
गोलक्षेत्रफलाद्यस्मादस्य क्षेत्रफलं यतः ।
सार्द्धद्विगुणितासन्नं तावदेवापरे दले ॥
एवं पञ्चगुणात् क्षेत्रफलात् पृष्ठफलं खलु ।
नाधिकं जायते तेन परिधिघ्नं कृतः कृतम् ॥
वृत्तक्षेत्रफलं यस्मात् परिधिघ्नं न युक्तिमत् ।
दुष्टत्वाद्गणितस्यास्य दुष्टं भूपृष्ठजं फलम् ॥"
अथान्यथा प्रतिपाद्यते ।
'गोलस्य परिधिः कल्प्यो वेदघ्न्यामितिर्मितः ।
सुखबुध्नगरेखाभिर्यद्वदामलके स्थितः ॥
दृश्यन्ते वप्रकास्तद्वत् प्रागुक्तपरिधिर्मितात् ।
ऊर्द्धाधःकृतरेखाभिर्गोले वप्रान् प्रकल्पयेत् ॥
तत्रैकवप्रकक्षेत्रफलं खण्डैः प्रसाध्यते ।
सर्व्वैक्यं त्रिभज्यार्द्धहीनं त्रिज्यार्द्धभाजितम् ॥
एवं वप्रफलं तत् स्याद्गोलव्याससमं यतः ।
परिधिव्यासघातोऽतो गोलपृष्ठफलं स्फुटम् ॥'
अथ भूमेः प्रलयभेदान् प्रलयञ्चाह ।
'वृद्धिर्विधेरह्नि भुवः समन्तात्
स्याद्योजनं भूभवभूतिपूर्व्वैः ।
ब्राह्म्य लये योजनमात्रवृद्धि-
र्नाशो भुवः प्राकृतिकेऽखिलायाः ॥
दिने दिने यन्म्रियते हि भूतै-
र्दैनन्दिनं तं प्रलयं वदन्ति ।
ब्राह्मं लयं ब्रह्मदिनान्तकाले
भूतानि यद्ब्रह्मतनुं व्रजन्ति ॥
ब्रह्मात्यये यत् प्रकृतिं प्रयान्ति
सर्व्वाण्यतः प्राकृतिकं कृतीन्द्राः ।
लीनान्यतः कर्म्मपुटान्तरत्वात्
पृथक् क्रियन्ते प्रकृतेर्विकारैः ॥
ज्ञानाग्निदग्धाखिलपुण्यपापा
मनः समाधाय हरौ परेशे ।
यद्योगिनो यान्ति निवृत्तिमस्मा-
दात्यन्तिकं चेति लयश्चतुर्द्धा ॥'
अथ ब्रह्माण्डगोलमाह ।
'भूभूधरत्रिदशदानवमानवाद्या
ये याश्च धिष्ण्यगगनेचरचक्रकक्षाः ।
लोकव्यवस्थितिरुपर्य्युपरिप्रदिष्टा
ब्रह्माण्डभाण्डजठरे तदिदं समस्तम् ॥"
अथान्योदित ब्रह्माण्डमानं पूर्व्वोक्तमपि प्रस-
ङ्गादनुवदति स्म ।
कोटिघ्नैर्नखनन्दषट्कनखभूभृद्भुजङ्गेन्दुभि-
र्ज्योतिःशास्त्रविदो वदन्ति नभसः कक्षामिमां
योजनैः १८७१२०६९२००००००००० ।
तद्ब्रह्माण्डकटाहसम्पुटतटे केचिज्जगुर्वेष्टनं
केचित् प्रोचुरदृश्यदृश्यकगिरिं पौराणिकाः
सूरयः ॥
करतलकलितामलक-
वदमलं सकलं विदन्ति ये गोलम् ।
दिनकरकरनिकरनिहत-
तमसो नभसः परिधिरुदितस्तैः ॥
ब्रह्माण्डमेतन्मितमस्तु नो वा
कल्पे ग्रहः क्रामति योजनानि ।
यावन्ति पूर्व्वैरिह तत्प्रमाणं
प्रोक्तं खकक्षाख्यमिदं मतं नः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोषः
समाप्तः ॥

भूच्छायं, क्ली, स्त्री, ( भुवश्छाया । "विभाषासेना-
सुराच्छायाशिशालाम् ।" २ । ४ । २५ । इति
तत्पुरुषे विभाषया नपुंसकम् । छायाबाहुल्ये
तु केवलं क्लीवत्वं) अन्धकारः । इति शब्दमाला ॥

भूजन्तुः, पुं, (भुवो जन्तुरिव ।) उपरसविशेषः । इति
राजनिर्घण्टः ॥ ( विशेषोऽस्य भूनागशब्दे
द्रष्टव्यः ॥ )

भूजम्बूः, स्त्री, (भूवो जम्बूरिव साद्दश्यात्) विकङ्कत-
फलम् । गोधूमः । इति मेदिनी । बे, १४ ॥
भूमिजम्बूः । इति राजनिर्घण्टः ॥

भूतं, क्ली, (भू + क्तः ।) युक्तम् । न्यायः । क्ष्मादिः ।
पृथिव्यप्तेजोवाय्वाकाशपञ्चकम् । (यथा, मनुः ।
१२ । १४ ।
"तावुभौ भूतसम्पृक्तौ महान् क्षेत्रज्ञ एव च ।
उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः ॥"
"स च त्रिविधो वैकारिकस्तैजसो भूतादिरिति ।
भूतादेरपि तैजससहायात्तल्लक्षणान्येव पञ्चत-
न्मात्राण्युत्पद्यन्ते । तद्यथा । शब्दतन्मात्रं स्पर्श-
तन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्र-
मिति । तेषां विशेषाः शब्दस्पर्शरूपरसगन्धा-
स्तेभ्यो भूतानि व्योमानिलानलजलोर्व्व्यः ।" इति
सुश्रुते शारीरस्थाने प्रथमेऽध्याये । )
ऋतम् । सत्यम् । इत्यमरभरतौ ॥ पिशाचादि ।
( यथा, श्रीभागवते । ३ । १४ । २१ ।
"एषा घोरतमा वेला घोराणां घोरदर्शना ।
चरन्ति यस्यां भूतानि भूतेशानुचराणि ह ॥")
जन्तुः । इति मेदिनीशब्दरत्नावल्यौ ॥ ( यथा,
मनुः । ६ । ८ ।
"स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समा-
हितः ।
दाता नित्यमनादाता सर्व्वभूतानुकम्पकः ॥"
स्थावरजङ्गमात्मकं द्वयम् । यथा, मनुः । ८ । ३०६ ।
"रक्षन् धर्म्मेण भूतानि राजा वध्यांश्च घात-
यन् !
यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः ॥")
वस्तुतत्त्वम् । यथा,—
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥
छलं प्रमादाभिहितम् । निरस्य परित्यज्य ।
भूतेन वस्तुतत्त्वानुसरणेन । व्यवहारान्नयेदन्तं
नृपः । यस्माद्भूतमपि वस्तुतत्त्वमपि अनुपन्यस्त-
मनभिहितं हीयते हानिमुपगच्छति व्यवहारतो
व्यवहारेण साक्ष्यादिभिः । तस्माद्भूतानुसरणं
कर्त्तव्यम् । यथार्थिप्रत्यर्थिनौ सत्यमेव वदतस्तथा
सभ्येन सभापतिना यतितव्यं सामादिभिरुपायै-
स्तथा सति साक्ष्यादिनैरपेक्ष्येणैव निर्णयो भव-
तीति ॥ अथ सर्व्वथापि भूतानुसरणं न शक्यते
कर्त्तुं तथा सति साक्ष्यादिभिर्निर्णयः कार्य्य-
इत्यनुकल्पः । यथोक्तम् । भूतच्छलानुसारि-
त्वाद्द्विगतिः समुदाहृता । भूतन्तत्त्वार्थयुक्तं यत्
प्रमादाभिहितं छलमिति ॥ तत्र भूतानुसारी
व्यवहारो मुख्यः । छलानुसारी त्वनुकल्पः ।
इति मिताक्षरायां व्यवहाराध्यायः ॥

भूतं, त्रि, ( भायते स्मेति । "आदृशाद्वेति णिच-
भावः । भू + क्तः । भूतिरस्त्यस्येति वा । अर्श-
आदित्वात् अच् । अभवदिति वा । भुवो गत्यर्थं
इति । भूतार्थे कर्त्तरि क्तः । ) प्राणी । जन्तुः ।
(यथा, ऋग्वेदे । ३ । २७ । ९ ।
"धिया चक्रे वरेण्यो भूतानां गर्भमादधे ॥"
यथा च चरके शारीरस्थाने तृतीयेऽध्याये ॥
"भूतानाञ्चतुर्व्विधा योनिर्जरायुजाण्डस्वेदोद्भिदः ।")
अतीतम् । ( यथा, कथासरित्सागरे । २ । २४ ।
"भूतं भवद्भविष्यद्वा किं तत् स्यात् जगति
प्रिये ।
भवती यन्न जानीयादिति शर्व्वोऽप्युवाच ताम् ॥")
वृत्तम् । (यथा, सुश्रुते चिकित्सितस्थाने । १०
अध्याये ।
"गोशकृद्भूतानां वा यवानां शक्तून् कार-
यित्वा ।")
समम् । सदृशम् । इत्यमरभरतौ ॥ प्राप्तम् ।
( यथा, महाभारते । १३ । ३४ । १५ ।
"यद् ब्राह्मणमुखात् प्राप्तं प्रतिगृह्णन्ति वै वचः ।
भूतात्मानो महात्मानस्ते न यान्ति परा-
भवम् ॥"
"भूतः प्राप्तो वशीकृत आत्मा चित्तं यैस्ते ॥"
इति तट्टीकायां नीलकण्ठः । ) सत्यम् ।
इति मेदिनीशब्दरत्नावल्यौ ॥ ( यथा शाकु-
न्तले । प्रथमाङ्के । "सूत्रधारः । सस्मितम् ।
आर्य्ये ! कथयामि ते भूतार्थम् ।") भूतकालस्य
पर्य्यायो यथा । वृत्तम् २ अतीतम् ३ व्यक्तम् ४
निर्वृत्तम् ५ गतम् ६ । इति राजनिर्घण्टः ॥
उत्तरपदस्थ एव भूतशब्दः समार्थं इति
शाब्दिकाः । यथा देवभूतोऽयम् । इति भरतः ॥
( उत्तरपदस्थ भूतशब्दः स्वरूपार्थोऽपि । यथा,
मनुः । १ । ५ ।
"आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः ॥")

भूतः, पुं, ( भू + कर्त्तरि क्तः । ) देवयोनिविशेषः ।
स च अधोमुखोर्द्धमुखादिः पिशाचभेदो बाला-
कुचरो बालग्रहः । इत्यमरभरतौ ॥ ( यथा,
मार्कण्डेयपुराणे । ५१ । ५३ ।
"विक्षिपेज्जुहुयाच्चैवाग्नौ मिश्रञ्च कीर्त्तयेत् ।
भूतानां मातृभिः सार्द्धं बालकानान्तु शान्तये ॥")
कुमारः । इति मेदिनी । ते, ४१ ॥ योगीन्द्रः ।
इति शब्दरत्नावली ॥ कृष्णचतुर्द्दशी । इति
त्रिकाण्डशेषः ॥ * ॥ भूतनाशकौषधम् । यथा,
"श्वेतापराजितामूलं पिष्टं तण्डुलवारिणा ।
तेन नस्यप्रदानं स्याद्भूतदृष्टस्य विद्रवम् ॥